—: ई ॐ श्रीः :—



श्रीसंस्कृतविश्वपरिषत्–समारम्भे

जगन्नाथपुरी–षष्ठाधिवेशने

वेदसन्देशनिवेदनम्

निवेदयिता

दैवरातः



ब्रह्मश्री दैवरातः, गोकर्ण



श्रीजगन्नाथपुरी-
"संस्कृतविश्वपरिषद्"
अध्यक्षः
राजर्षिः श्रीराजेन्द्रप्रसादः
चिरं विजयतेतराम्

राम. महाबलेश्वर. शास्त्री. भडति. गोकर्णो.

❀ ई ॐ श्रीः ❀

॥ ॐ भद्रं नो अपि वातय मनः ॥

संस्कृतविश्वपरिषत्

ॐ सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ॥
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधि वाचि ॥

—इति बृहस्पतिः (ऋ० सं० मं० १०-७१-२)

('बृहस्पते बृहस्पतिर्ज्ञानं तुष्टाव' इति सर्वानुक्रमसूत्रोदितम् । समग्रेऽस्मिन् सूक्ते ज्ञानसंस्तवनमस्ति समुपवर्णितम् ॥)

विदितमस्तु तत्रभवताम्—

यदिह प्रपञ्चे परिदृश्यमानायामुच्चावचं परिवर्तमानायामस्यां ईशसृष्टौ सदसद्विवेकशालिनीं मानवजातिमधिकृत्य सदसदात्मकेषु कर्तव्य-अकर्तव्य-वस्तुबोधादिविषयेषु प्रवृत्तानि ईशशासनरूपाणि ऋग्वेदादीनि शास्त्रात्मकानि संस्कृतवाङ्मयानि प्रसिद्धान्येव सन्ति । तानि च नियतप्रवृत्ति-निवृत्ति परात्मनिष्ठापराणि विधि-निषेध-वस्तु-तत्त्वोपदेशरूपाणि वेदवाङ्मुखेन संवित्प्रमुखेन छन्दःसंहितेन आविर्भूतानि देववाणीस्वरूपेण दिव्यतेजोरूपेण प्रकटितानि, व्याकरणादिनियमैः आविष्कृतानि संस्कृतमुखेन प्रकाशितानीति च सुप्रसिद्धम् । तान्येव ऋग्वेदादिशास्त्राण्यनुसृत्य तदध्ययन-तदर्थज्ञान-तदाचरण-तत्प्रचार-णादिपरम्परया प्रत्यक्ष-परोक्ष-अपरोक्षरूपेण सुविततानां अधिभूत-अधिदैवत-अध्यात्मतत्त्वात्मकानां अचेतन-प्रचेतन-सचेतनस्वरूपाणां जगद्-ईश-जीवात्मनां समन्वयेन ज्ञानोपासनाकर्माणि तद्योगादीनि च अस्माकं पूर्वे महर्षयः प्रकाशयामासुरिति विदितचरमेव विदुषाम् ॥

अथ तेषामेव महर्षीणां तथैवान्येषामपि पूर्वाचार्याणां अविच्छिन्नोपदेशपरम्पराप्रवाहधारासमागतया तत्प्रचलितया संस्कृत्या, संस्कृतवाङ्मयमुखेन दिगन्तव्याप्तया सद्विद्यया विश्वव्यापकं सर्वं प्रापञ्चिकं संव्यवहारज्ञानं, तथा पारमार्थिकं परवस्तुतत्त्वज्ञानं च सर्वे मानवाः सम्पादयामासुरिति प्रतीयते ॥

तदिह अस्माकं बुद्ध्यादीनि सर्वाण्यपीन्द्रियाणि बाह्याभ्यन्तराणां सर्वेषां वस्तूनां विषयाणां च बोधे तत्सङ्ग्रहे एव उपकरणानि भवन्ति । स्वविदितानां ज्ञानरूपेण सङ्गृहीतानां तेषां सर्वेषामर्थानां प्रकाशनमेकमेव वाचः सामर्थ्यं तद्वैशिष्ट्यं चेति तदिदं सर्वेषामप्यनुभवसिद्धमेव । तस्मात् सर्वासामपि विद्यानां विषयाणां च आदाने प्रदाने च वागेव सर्वथा शरणं प्रधानं करणमिति च सम्पद्यते ॥

एवमिह वाङ्मुखेनैव वाचः शिक्षणार्थं तथा वाग्द्वारैव सर्वविद्यादिशिक्षणार्थं च विद्या-ज्ञान-तदुपार्जन-तत्प्रकाशनादयः सर्वेऽपि समारम्भाः भवन्ति । एतदर्थानुभावबोधकोऽयं बृहस्पतेरार्षेयः ऋङ्मन्त्रवर्ण एव प्रत्यक्षं प्रमाणम्, आदौ मङ्गलमुखेन समुदाहृतम्— 'सक्तुमिव तितउना पुनन्तः .... भद्रैषां लक्ष्मीर्निहिताऽधि वाचि' इति । तस्यायमर्थः पूर्वाचार्यसमर्थितः—

अत्र 'तितउ परिपवनं भवति' इति यास्कनिरुक्तवचनात्, तथा 'चालनी तितउः पुमान्' इति अमरकोषवचनाच्च तितउनामकं पिष्टादिचालनसाधनं चालनीपदवाच्यम्, तेन 'तितउना' संशोधनादिसाधनेन चालन्यादिना, 'सक्तुं' पिष्टादिकं यथा पुनन्ति शोधयन्ति, तद्वत् सदसद्विवेकशालिना आन्तर्येण स्वात्मीयेन सूक्ष्मेण अन्तःकरणरूपेण, 'मनसा' स्वकीया वाग् यथार्थानुवादिनी यथाभवेत् तथा स्वां वाचं, 'शोधयन्तः' असत्यैर्दुष्टैः पदार्थैर्विषयैश्च विवेचयन्तः, 'यत्र' यस्मिन् विषये, 'धीराः' बुद्धिशालिनः पुरुषाः तां मनःपूतां

सत्यां यथार्थां वाचमनुवदन्ति, 'अत्र' अस्मिन् विषये, 'सखायः' समानभाषाज्ञानिनः, 'सख्यानि' तानि सखिप्रोक्तानि वचनानि तथा तदर्थरूपाणि वस्तु-विषयादिजातानि, 'जानन्ति', तेषामेषां तस्यां 'वाचि', 'भद्रा' मङ्गलप्रदा सर्वलक्षणसम्पन्ना प्रत्यक्षप्रमाणभूता सर्वज्ञानप्रकाशनसमर्था सर्वशक्तिमयी च 'लक्ष्मीः' श्रीर्देवता 'अधि-निहिता' प्रतितिष्ठतीति यावत् । एतेन परोक्षादिसर्ववस्तुस्वरूप-तत्त्वज्ञाने तथा तत्प्रकाशनेऽपि वागेव प्रत्यक्षं प्रमाणं, प्रधानं साधनं इति च सङ्गच्छते ॥

अथ पुनरस्मिन् प्रपञ्चे विश्वसृष्टेरपि पूर्वं उत्तरत्र सम्भाव्यमानानां सर्वेषां प्राणिनां विशेषतो मानवानां हितशासनरूपेण सर्वज्ञानप्रकाशनाय सर्वविद्याप्रतिपत्तये च तस्मात् परमात्मनः सकाशात् सर्वस्वहवनरूपात् सर्वहुतो यज्ञात् विश्वोदयार्थं सर्वस्वहवनेन सम्पन्नात् प्रज्ञानात्मनो ज्योतिषः ऋगादयश्छन्दोमयाः मन्त्रमयाः वेदवाङ्मयाः प्रादुर्बभूवुरिति श्रूयते । तदिदं नारायणार्षेयं ऋङ्मन्त्रदर्शनम्—

'तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ॥
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥'

(इति ऋ० १०, ९०, ६)

तस्य परमपुरुषस्य परमात्मनो मुखात् निःश्वासरूपेण निःसृतान् तान् प्रत्यक्षब्रह्मरूपान् ऋगादीन् वाङ्मयान् पूर्वे महर्षयः तपसा निर्विकल्पे समाधौ भगवत्प्रसादात् तदनुज्ञया च स्वात्मन्येवान्तः प्रतिशुश्रुवुः । स्वान्तः श्रवणेनैव तानुपप्राप्नुवन्, तस्मादेव सा छन्दोमयी वागेव श्रुतिरित्याख्यायते । तदेव हि छन्दसां दर्शनम् । तेनैव हि दिव्यमन्त्रश्रवणेन ऋषीणामृषित्वं सम्पद्यते 'ऋषिर्विप्रः काव्येन' इति तदनुश्रवणात्, 'ऋषिर्दर्शनात्' इति यास्कनिरुक्त-वचनाच्च ॥

'अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥'

'युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा ॥'

इत्यादिवचनैरपि तदेव प्रतिपादितं भवति ॥

ते च छन्दोमया मन्त्रा एव सर्वदेवतानामधिष्ठानभूताः । अत एव ते देवाः स्वयं तन्मन्त्रशरीराः सन्तः तां प्रत्यक्षब्रह्मात्मिकां वाचं अधितिष्ठन्ति । तस्मात् सा देववाणीति गीयते । तमिमं प्रत्यक्ष-ब्रह्मरूपं सर्वतः श्रेष्ठं मन्त्रं स्वयं ब्रह्मणस्पतिरेव वदतीत्यनुश्रूयते । तथा च ऋङ्मन्त्रवर्णः काण्वार्षेयः ॥

'प्रनूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ॥
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे ॥'

(इति ऋ० १, ४०, ५)

'ओको दधे ब्रह्मण्यन्तश्च नरः' इति च दर्शनान्तरम् ॥

अपि च सर्वहितानुशासनात् तदिदं ऋग्वेदादिवाङ्मयमेव शास्त्रमिति प्रशस्यते, तज्जनकत्वाच्च ब्रह्मणः शास्त्रयोनित्वं प्रतिज्ञायते । तथैव ब्रह्मादिपरोक्षवस्तुनः स्वरूपतत्त्वाधिगमे कारणत्वेन ऋगादिवचनं एव प्रत्यक्षं प्रमाणमिति स्वीक्रियते सर्वैरपि शास्त्रचिन्तकैः शब्दप्रमाण-वादिभिः तत्त्वत्रयार्थेषु सर्वत्रापि शब्दैकतन्त्रप्रत्यक्षप्रमाणान्वयात् । तथा च सूत्रितं ब्रह्ममीमांसायाम्— 'शास्त्रयोनित्वात्' इति (ब्र० सू० १–१–३) ॥ तस्येदं शारीरकं भाष्यवचनम्— 'महतः ऋग्वेदादेः शास्त्रस्य अनेकविद्यास्थानोपबृंहितस्य प्रदीपवत् सर्वार्थाव-द्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म, न हि ईदृशस्य शास्त्रस्य ऋग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः सम्भवोऽस्ति, यद्यद् विस्तरार्थं शास्त्रं यस्मात् पुरुषविशेषात् सम्भवति —

यथा व्याकरणादिपाणिन्यादेर्ज्ञेयैकदेशार्थमपि स ततोऽप्यधिकतरविज्ञान इति प्रसिद्धं लोके, किमु वक्तव्यम् — अनेकशाखाभेदभिन्नस्य देवतिर्यङ्मनुष्यवर्णाश्रमादिप्रविभागहेतोर्ऋग्वेदाद्याख्यस्य अप्रयत्नेनैव लीलान्यायेन पुरुषनिःश्वासवत् यस्मान्महतोभूताद्योनेः सम्भवः । अस्य महतोभूतस्य निश्वसितं यदृग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः' इत्यादि श्रुतेः, तस्य महतोभूतस्य निरतिशयं सर्वज्ञत्वं सर्वशक्तिमत्वं चेति । अथवा यथोक्तमृग्वेदादिशास्त्रं योनिः कारणं प्रमाणं ब्रह्मणो यथावत्—स्वरूपाधिगमे, शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यते इत्यभिप्रायः, इत्यादि ॥

तस्याः वेदवाण्याश्छन्दोमय्याः मन्त्ररूपायाः सर्वार्थप्रकाशनार्थं ब्राह्मण-आरण्यक-उपषित्सञ्ज्ञकाः श्रौतवाङ्मयाश्च विनिःसृताः सन्तः ऋषिमुखात् प्रसिद्धिं गताः । तत्रापि विधि-निषेधादिमुखेन, प्राणोपासनादिमार्गदर्शनेन, ब्रह्मात्मादिवस्तुतत्त्वज्ञानाद्युपदेशेन च तेषां प्रत्यक्षब्रह्मरूपाणां वेदमन्त्राणां साक्षात्सम्बन्धात् 'ब्रह्मणः इदं ब्राह्मणं' इति व्युत्पत्त्या च सिद्धं तदिदं ब्राह्मणारण्यकोपनिषद्रूपं वेदमन्त्रार्थ—व्याख्यानात्मकं सर्वं वाङ्मयं ब्राह्मणमिति नाम्ना व्यवह्रियते । 'तदेतदृचाभ्युक्तम् । तदुक्तमृषिणा । तदभ्युक्तमृचा । तदप्येष श्लोको भवति । गर्भ एवैतच्छयानो वामदेव एवमुवाच । तद्धैत—त्पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति' इत्यादिरूपेण तत्र तत्र ब्राह्मणारण्कोपनिषत्सु बहुधा निर्देशात् । तदिह तयोर्मन्त्र—ब्राह्मणयोरुभयोरपि साहित्येन सामान्यतः प्रसिद्धं वेदनामधेयं, 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति आपस्तम्बादिसूत्रात् ॥

तेषामेतेषां सर्वेषां वेदवाङ्मयानां मन्त्रब्राह्मणरूपाणां अर्थादि—प्रकाशनाय प्रवृत्तानि षडङ्गानि 'शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्दो, ज्योतिषम्' इति प्रसिद्धानि । तेषु व्याकरणमेव वेदानां

मुखम्, व्याकरणमुखेनैव वैदिक-संस्कृतादिशब्दव्युत्पत्तिमुखेन समग्र-वेदार्थज्ञानोदयसम्भवात् । संस्कृतशब्दव्युत्पत्त्यादिज्ञाने तु व्याकरणं एव मुख्यमङ्गमित्यर्थः । तदर्थज्ञाने निरुक्तं द्वितीयमङ्गम् ॥

अथ पुनः सर्वज्ञकल्पैर्महर्षिभिः सर्वज्ञैश्च बालभावमुपाश्रितैः बालभाषयेव अनूदितानां सामरस्यादिमुखेनाभिगीतानां वेदवाचां रहस्यार्थप्रकाशनार्थमुत्तरत्र व्याकरणादिनियमैः संस्कृतायास्तस्याः एव वेदवाण्याः देववाणीस्वरूपायाः संस्कृतभाषेति सर्वत्र सुप्रसिद्धं विशिष्टं नामधेयम् ॥ सैव सर्वासामपि भाषाणां मूलभूतत्वात् मातृवत् सर्वभाषाजननीति न पुनर्वक्तव्यमापतति ॥

ततश्च तस्या एव संस्कृतभाषायास्तेभ्य एव संस्कृतशब्देभ्यश्च समग्रेऽस्मिन् भूमण्डले प्रचलिताः सर्वा अपि प्राकृतभाषाः प्राकृतशब्दाश्च किञ्चित्किञ्चित्स्वरूपादिविपररिणामेन परिकल्पिता भवन्ति । कुत एतदधिगम्यते ? कथम् ? अकस्मादिदं प्रतिज्ञायते च सर्वभाषाणां माता मूलभूता सा संस्कृतभाषैवेति, उच्यते सर्वभाषामूलभूतानां चतुःषष्टिवर्णानां प्रतिज्ञातत्वाद् वेदाङ्गशिक्षायाम् ॥

तथा च सर्वस्मादादिमे अक्षरसमाम्नाये 'अ इ उ ण्' इत्यादिभिः चतुर्दशसूत्रैः सङ्ग्रथितेषु द्विचत्वारिंशद्वर्णेषु अन्तर्हितानां चतुःषष्टिवर्णानां संशोधनेन समुद्धरणात् । तथा हि पाणिनिराह—

'त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः ।
प्राकृते संस्कृते चापि स्वयम्प्रोक्ताः स्वयम्भुवा ॥' इति ॥

ते च वर्णाः—

'स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥
अनुस्वारो विसर्गश्च ≍क≍पौ चापि पराश्रितौ ।
दुस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च ॥' इति ॥

एतैः कण्ठादिभिरिन्द्रियै यावन्तो वर्णाः समुच्चरितुं शक्याः त एते चतुःषष्टिवर्णेष्वेव नियताः । नातःपरं अधिकं कल्पयितुं शक्यम् । तस्मात् इतोऽप्यधिकं वर्णं कल्पयितुं कस्याश्चिद्भाषायां कस्यचिदभीष्टं चेत् तदर्थं पृथक् इन्द्रियान्तरमपि सम्पादनीयं भवेदिति चिरं चिन्तनीयमेवेदमिति वक्तव्यमापतति ॥

एवं निर्दिष्टानामेतेषामेव चतुःषष्टिवर्णानां अनुकरणेन सर्वास्वपि भाषासु गृहीतत्वात्, सर्वासां भाषाणां मूलभूता आदिमातैव सा संस्कृता भारती देववाणी वेदवाणीति च सर्वं सुसम्पन्नं स्वतःसिद्धं तत्त्वम् । तद्वदेव ताश्च प्राकृतभाषाः तत्र तत्र प्रदेशान्तरेषु स्थितानां मानवानां प्रादेशिकी भाषाः समपद्यन्त । तास्तु तत्रत्यानां मातृभाषेति संव्यवहारास्पदीभूताः सत्यः शतशः सहस्रशो रूपेण अनन्तमुखेन विकीर्णाः सम्प्रति विश्वतोमुखेन प्रचलन्ति । तथा समग्रेऽस्मिन् भूमण्डले सर्वेषामपि मानवानां ताः सर्वा अपि भाषाः तेषां तेषां स्वस्वमातृभाषाद्यभिमानास्पदीभूताः संवृत्ता इति तासां तदिदं विशिष्टं गौरवास्पदमिति न पुनर्व्याख्येयम् । सा मातृभाषैव तेषां तेषां हार्दिकी भाषेति निर्विवादं सौहार्दास्पदम् ॥

वस्तुतस्तु सर्वासामपि प्राकृतभाषाणां तत्तन्मातृभाषाणां (मातृवत्) मूलभूता जननी आदिमा सा सर्वप्राणभूता संस्कृतभाषैव सर्वाभ्योऽपि मुख्या मातृभाषा मूलप्रमाणभूतेति नित्यसिद्धं सत्त्वम् । तत्र सर्वभाषामूलभूतायाः तस्याः संस्कृतभाषायाः सङ्ग्रहणे यथार्थ-स्वरूपादिज्ञाने स्वस्वहार्दिकी मातृभाषैव सर्वथा शरणमिति सर्वानुभव-सिद्धम् । स्वस्वमातृभाषाद्वारैव संस्कृतभाषायाः तथा सर्वासां प्राकृतानां भाषान्तराणां च ज्ञानं भवितुमर्हति इति तदिदं महद्गौरवं मातृभाषायाः इत्येव सर्वेषामपि प्रहर्षास्पदमेव ॥

अत्रेदं महद्विपादास्पदं सर्वेषाम्— यदिह सर्वभाषामूलभूता सा संस्कृतभाषैव मम अस्माकं च मातृभाषेति अभिमन्यमानस्तथा भाषमाणः च न कश्चिदपि दृश्यते नापि श्रूयते, तद्वदेव मातृभाषावत् संस्कृत-भाषानुवादिनी न काचिदपि माता विद्यते, येन तत्पुत्राणां मातृभाषा संस्कृतभाषैव भवितुमर्हेत्, इति चिरं शोचनीयमेवैतत् । एवमस्माभिः चिराद्विस्मृता अज्ञानेन परित्यक्ता ज्ञानेनाप्यनादृता सा भगवती स्वयं संस्कृता वाङ्मातैव क्षन्तुमर्हति अस्माकं तदनादरणाद्यपराधसर्वस्वमपीति सर्वशरण्यां विश्ववरेण्यां तामेव सम्प्रार्थये ॥ वस्तुतस्तु देववाणी-स्वरूपा संस्कृतभाषैव यदि मन्वादीनां हार्दिकी मातृभाषा आसीदिति अनुमन्यते चेत् तर्हि सैव अस्माकं सर्वेषामपि मानवानां हार्दिकी मातृभाषा भवितुमर्हतीति प्रतीयते, प्रतिज्ञायते च प्रत्यक्षप्रमाणभूतेन वेदवाणीमुखेन । तदिदं प्राचां महर्षीणां वैदिकं तत्त्वम् ॥

कुत एतत्? कथं वा एतदकस्मादुद्भूतम्, अभूतपूर्वम्, अश्रुत-पूर्वम्? केन वा परिकल्पितम्? कथं वा सङ्गच्छते? इति उच्यते ॥

मन्वादयो महर्षयः खलु सर्वेषामेवास्माकं मानवानां मानव-जातेरेव मूलपुरुषाः मनोरेवापत्यसम्भूतत्वात् तत्सन्तानपरम्परागतत्वात् चेति निर्विवादम् । यदि वयं तेषां बीजक्षेत्रादिप्रवाहपरम्परया तदविच्छिन्नधारया सर्वेऽपि मानवाः समुत्पन्नाः, अर्थात् मानवजातिरेव मनोरपत्यसम्भूता, यदि च अस्मासु तेषां मन्वादीनां आर्षेयत्वाभिमानः तेषां बीजक्षेत्रसिद्धा आर्षेयसंस्कृतिश्च इदानीमपि जागर्ति चेत् तेषां आत्मीयत्वाभिमानेन सत्सम्बन्धे सिद्धे तद्भाषाभिमानसम्बन्धमात्रं नास्तीति वचनमकिञ्चित्करं भवेत् । वदतो व्याघात इव वा तदज्ञानमात्रोदितमिति वा चिरं चिन्तनीयमेव । तेषां हार्दिकी भाषा वेदवाग्रूपा देववाण्येवेत्यत्र ऋगादिमन्त्रवचनमेव प्रत्यक्षं प्रमाणम् । तथाहि द्विविधाः खलु ते मानवाः तदानीन्तनाः

आसन् अनूचानाः अननूचानाश्चेति प्रसिद्धाः । गुरुमुखादुदितं अनुवदन्तः, तथा तदनुसृत्य वेदादिकमधीयानाः ते अनूचानाः । तपोयोगादिना स्वयंस्फूर्तिरूपेण स्वानुभावोदितमेवोपदिशन्तः अननूचानाः । ते च अतीन्द्रियार्थद्रष्टारो मन्त्रद्रष्टारः स्वयम्प्रज्ञाः ऋषयः । तेषां तादृशं वचनमेव आर्षं दर्शनं भवितुमर्हति ॥

'यो अनूचानो ब्राह्मणो युक्त आसीत्' इति (ऋ० १०) ॥

'ये वा अनूचानास्ते कवयः' इति च ब्राह्मणम् (ऐ० ब्रा०) ॥

अननूचानत्वं तु 'यद्वैकिञ्च अननूचानोऽभ्यूहति आर्षं तद् भवति' इति यास्कनिरुक्तवचनोदितम् । तत्र मूलप्रमाणभूतं ऋङ्मन्त्रदर्शनं बार्हस्पत्यार्षेयम् —

'हृदा तष्टेषु मनसो जवेषु यद्ब्राह्मणाः संयजन्ते सखायः ॥
अत्राह त्वं विजहुर्वेद्याभिरोहब्रह्माणो विचरन्त्यु त्वे ॥'
(इति ऋ० १०-७१-८)

'....गुहा निषीदन् ॥ विन्दतीमत्र नरो धियन्धा हृदा यत्तष्टान् मन्त्राँ अशंसन् ॥' इति च पाराशर्यार्षेयम् (ऋ० १-६७-१) ॥

एतेन प्राचामृषीणामन्तर्हृदये तपसा स्वयंस्फुरणेन समुद्गता वेदरूपा संस्कृतभाषैव तेषां हार्दिकी भाषेति सम्पद्यते ॥

महर्षेर्वामदेवस्य तु ततोऽपि विलक्षणं विचित्रतरमिति श्रूयते । 'अहं मनुरभवं सूर्यश्च' इति तृचम् (ऋ० ४-२६-१-३१) । तस्येदमौपनिषदं ब्राह्मणानुवचनं याज्ञवल्क्योद्गीतम्- 'ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात् तत् सर्वमभवत्० इत्यादि० 'तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति' इति (बृ० उ०) । तस्य एतस्य दर्शनस्य वेदवचनस्य तदर्थस्य च शास्त्रीयदृष्ट्युदितत्वेन तत्र मिथ्याभिमानादिराहित्येन च

सामरस्यपूर्णब्रह्मात्मदर्शनोद्गाररूपत्वं समर्थितं ब्रह्ममीमांसायाम्— 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' इति (ब्र० सू० १-१) ॥

ततोऽपि विचित्रतरः गर्भ एव शयानस्य वामदेवस्य तादृश-तत्त्वदर्शनानुभावोदितः ऋङ्मन्त्रदर्शनोद्गारः । 'गर्भ एवैतच्छयानो वामदेवः एवमुवाच' इति ऐतरेयिणामौपनिषदं ब्राह्मणवचनम् । तस्यायं मूलप्रमाणभूतो मन्त्रवर्णो वामदेवार्षेयः— 'गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा' इति (ऋ० ४-२७-१)। अथवा गर्भवत् अन्तर्हिते हृदये मूर्ध्नि मूलाधारे वा पूर्णे निर्विषयके समाधौ बालभावेन संस्थितस्य तस्य ब्रह्मात्मनिष्ठस्य वामदेवस्य तदनुभावाविर्भूतं आर्षं दर्शनं भवितुमर्हति ॥

एवं तेषु अतीन्द्रियार्थद्रष्टृषु ऋषिषु सन्निविष्टां तपसा संस्फुरितां तां छन्दोमयीं वाचमेव अन्येऽपि प्रापुवन् । तां ब्रह्ममयीं वाचमनुसृत्यैव सर्वेऽपि ज्ञानं विज्ञानं च सम्पादयामासुरिति स्पष्टम् । अस्मिन्नर्थे बार्हस्पत्यार्षेयं ऋङ्मन्त्रदर्शनम्—

'यज्ञेन वाचः पदवीयमायन्तामन्वविन्दन्नृषिषु प्रविष्टाम् ॥
तामाभृत्या व्यदधुः पुरुत्रा तां सप्तरेभा अभिसन्नवन्ते ॥' इति ॥
(ऋ० १०-७१-३)

अस्यायमर्थः— ते पूर्वे महर्षयः 'यज्ञेन' तपो-योग-सत्य-धर्मादिरूपेण साधनेन 'वाचः पदवीयं' मूलं स्थानं उपजग्मुः, ततश्च तेषु 'ऋषिषु' अतीन्द्रियार्थद्रष्टृषु मन्त्रद्रष्टृषु 'प्रविष्टां' स्वयंस्फूर्तिरूपेण अभ्युदितां तां छन्दोमयीं वाचमन्वविन्दन्, ततश्च अन्येऽपि तेषां मुखादेव तां सङ्गृह्य सन्दधुः विशेषतः प्रकाशयामासुः, तां वाणीं सप्तफलरूपाः तत्साधनरूपाः सकलपुरुषार्थरूपाः सदर्थाः अभि-संविशन्ति, इति ॥

'अभि वाणीर्ऋषीणां सप्त नूषत' इति च दर्शनान्तरम् ॥

एवमेव श्रद्धा-मेधा-शची-वाक्-सार्पराज्ञीप्रभृतीनां ऋषि-स्त्रीणामपि ऋङ्मन्त्रदर्शनं अस्मिन्नर्थे प्रमाणम् । तेन तासामपि हार्दिकी भाषा संस्कृतवागेवेति सिध्यति—

'श्रद्धयाऽग्निः समिध्यते' इति श्रद्धा कामायनी ऋषिका (ऋ० १०-१, १-५) । 'मेधा देवी जुषमाणा न आगात्' इति मेधादेवी (यजुः) । 'उदसौ सूर्यो अगात्' इति शची पौलोमी (ऋ० १०-१५९, १-६) । 'अहं रुद्रेभिर्वसुभि-श्चरामि' इति वाग् आम्भृणी (ऋ० १०-१२५, १-८) । 'आ यं गौः पृश्निरक्रमीत्' इति सार्पराज्ञी (ऋ० १-३) ॥

'गोधा घोषा विश्ववाराऽपालोपनिषन्निषत् ।
ब्रह्मजाया जुहूर्नामाऽगस्त्यस्य स्वसाऽदितिः ॥
इन्द्राणी चेन्द्रमाता च सरमा रोमशोर्वशी ।
लोपामुद्रा च नद्यश्च यमी नारी च शश्वती ॥
श्रीर्लाक्षा सार्पराज्ञी वाक् श्रद्धा मेधा च दक्षिणा ।
रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिताः ॥'

इति सर्वानुक्रमपरिभाषापरिगणिताः मन्त्रदर्शनाग्रगण्याः स्त्रियः ऋग्वेदे प्रसिद्धाः ब्रह्मवादिन्यः इति ॥

तद्वदेव मैत्रेयी-गार्गीप्रभृतयो ब्रह्मवादिन्य आसन् । तासां याज्ञवल्क्येन सह गीर्वाणवाण्यैव ब्रह्मात्मादिवस्तुतत्त्वविषये वाद-विवादादिरूपेण प्रश्नोत्तररूपेण प्रवृत्तं निर्वृत्तं च ऐतिहासिकं औपनिषदं ब्राह्मणवचनमपि अस्मिन्नेवार्थे प्रमाणम् । संस्कृतभाषैव तासां हार्दिकी मातृभाषेत्यस्य उपोद्बलकं भवति ॥

'याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः मैत्रेयी च कात्यायनी चेति । तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव । सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां, यदेव भगवान् वेद तदेव मे ब्रूहीति' इति मैत्रेय्याः प्रश्नवचनम् (बृ० उ० ४-५-४) ॥

'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, मैत्रेयि, आत्मनि खल्वरे दृष्टे श्रुते मते सर्वमिदं विदितं भवति' इति याज्ञवल्क्यस्य प्रत्युत्तररूपं वचनम् (बृ० उ० ४-५-६) ॥

'अथ हैनं गर्गीवाचक्नवी पप्रच्छ याज्ञवल्क्येति होवाच' इति (बृ० उ० ३-६-१) ॥

'अथ ह वाचक्नवी उवाच— सा होवाच अहं वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वा उग्रपुत्रः उज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वा उपोत्तिष्ठेत्, एवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्थाम् । तौ मे ब्रूहीति' इति गार्गीप्रश्नवचनम् (बृ० उ० ३-८-२) ॥

'स होवाच एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति० एतस्य वा अक्षरस्य प्रशासने गार्गि, सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' इत्यादीनि याज्ञवल्क्यस्य प्रत्युत्तरवचनानि (बृ० उ० ३-८-८) ॥

किमितोऽप्यस्ति किञ्चिदधिकं विशिष्टं प्रकृष्टार्थकं संस्कृतसत्त्वम्? ओमिति – ब्रवीमि – किं तत् तावन्महत्त्वं वेदवाचः संस्कृतभारत्याः? उच्यते— सा वेदवाङ्मयी दिव्या संस्कृता वाग्देवतैव सर्वेषामपि मानवानां स्वतन्त्रं ज्ञानं सम्पादयति, पवित्रं जीवनं च निर्वर्तयति । तयैव वाचा दिव्येन वाग्रसेन च सर्वेऽपि जनाः जीवन्ति जानन्ति चेति भावः । एतस्मिन्नर्थे दैर्घतमसार्षेयं ऋङ्मन्त्रदर्शनम्—

'गौरीर्मिमाय सलिलानि तक्षती' (ऋ० १-१६४-४१) ॥

'तस्याः समुद्रा अधिविक्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः ॥ ततः क्षरत्यक्षरं तद्विश्वमुपजीवति' इति च (ऋ० १-१६४-४२) ॥

किं तावत् प्राप्तम्? उच्यते— परमात्मनः परायाः वाक्छक्तिरूपायाः शब्दशक्तेरेव प्रसादात् सर्वसम्पदभ्युदयः, तस्याः प्रतापादेव सर्वस्यापि जगतो विश्वविपत्पराजयः, तत्प्रभावादेव विश्वतो विजयः, तत्प्रचारात् सर्वथा ज्ञानोदयः, तस्या वाग्रसादेव विश्वसञ्जीवनादयोऽपि भवितुमर्हन्ति इति परमं गौरवं संस्कृतायाः वाचः मातृदेवतायाः इति । तथा च वाग्रसस्य परं सत्त्वमनुश्रूयते— 'ओष्ठापिधाना नकुली दन्तैः परिवृता पविः । सर्वस्यै वाच ईशाना चारुमामिह वादयेदिति वाग्रसः' इति (ऐ० आ०) ॥

अपि च 'स्ववीर्यगुप्ता हि मनोः प्रसूतिः' इति कवीन्द्रवचनादपि तदेव सिध्यतीति प्रतीयते । कथम्? उच्यते— मनोः सकाशात् समुदिते तदन्वये बीजक्षेत्रादिसिद्धं सुवीर्यम् । स्वात्मरक्षणे स्वतन्त्रजीवने सर्वविजये च सामर्थ्यमित्युक्ते विद्यायां ज्ञाने वचनेऽपि तत्समानमिति अर्थात् सिध्यति । किं तावता क्षात्रतेजसो वर्णनपरेण वचनेन? तत्राप्यस्ति किञ्चिद्विशिष्टं सत्त्वम् । तथा हि तेजोऽबन्नात्मकैः वाक्-प्राण-मनःसत्त्वकैस्त्रिकरणैः त्रिवृत्कृतेऽस्मिन् मानवशरीरे शारीरके जीवात्मनि च प्राण-मनःसत्त्वकं कायिकं मानसिकं च सुवीर्यं यदि जीवति जागर्ति चेति सिद्धं चेत् वाचिकं वाक्सत्त्वमात्रं तत्रापि मनोः तत् संस्कृतवाक्सत्त्वमेव ततो निर्गतं प्रच्युतं प्रक्षीणमिति च कथं सङ्गच्छते? तत्र मनोः प्राण-मनःसत्त्वाभ्यां सह संस्कृतं वाक्सत्त्वमपि सूक्ष्मबीजरूपेण अन्तर्हितं भवितुमर्हतीति अवश्यमेवाभ्युपगन्तव्यम् । तदिह सर्वेषां मानवानां सखिता समानभावता स्वात्मीयता च वाङ्मुखेनैव सम्पादयितुं शक्या, साऽपि सर्वभाषामूलभूतेन संस्कृतवाङ्मयमुखेनैवेति सम्पद्यते ॥

अयं भावः अद्यत्वेऽपि तावत् ऐकमत्येन समग्रेऽस्मिन् प्रपञ्चे परिवर्तमानाः सर्वेऽपि मानवाः स्वस्वमातृभाषावत् सर्वभाषामूलभूता सा संस्कृतभाषैव स्वकीया मातृभाषेति स्वीकर्तुं शक्नुयुरिति नैव असम्भाविनी इयं संस्कृतवाङ्मातृनिष्ठा सर्वेषामपि समाना सर्व-मान्येति । 'समानविद्याव्यसनेषु सख्यम्' इति कवेर्वचनादपि एतदेव सिध्यति । तस्मात् सर्वेषामप्यैकरूप्येण सखित्वे ऐकमत्येऽपि च सर्वसमानैकभाषाश्रयणमेव प्रधानं साधनं, तच्च संस्कृतभाषाया एव प्रथमं स्थानं, सर्वमान्यं समानं सर्वास्पदं सर्वश्रेष्ठतमं मातृवत् मातृभाषावत् सर्वगौरवास्पदीभूतं महत्तमं परमं पदमिति प्रतिज्ञायते । अत एव तदर्थमेव समग्रेऽस्मिन् भूमण्डले सर्वेषां मानवानां तच्छिक्षणोपदेशः शास्त्रदृष्ट्या समदृष्ट्या च सङ्गच्छते । तथा च मनुः — 'सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् । तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥ एतद्देशप्रसूतस्य सकाशादग्रजन्मनः । स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः' इति (मनुस्मृतिः अ० २) ॥

अत्र विदुषां वेदशास्त्रादिमुखेनैव पृथिव्यां सर्वमानवेभ्यः स्वस्वचरित्रशिक्षणार्थं उपदेशः स्वयं मनुनैव विहितः स्वकीयानां हितार्थम् । तच्च शिक्षणं संस्कृतशब्दैः संस्कृतभाषामुखेन संस्कृत-वाङ्मयेनैव भवितुमर्हति, नान्यथेति स्पष्टम् ॥

अथ तद् भाषान्तरेणापि तत्तन्मातृभाषामुखेनैव भवितुं शक्यं, तथैव साधयितुं युक्तमिति चेत् नैतदेवम् । कथम्? उच्यते— संस्कृत-वैदिकादिशब्दानां मूलशब्दव्युत्पत्त्यादिना तत्स्वरूपज्ञानेन च यावानर्थः सम्पद्यते, ज्ञातुं सम्पादयितुं च शक्यते, नैव तावानर्थः भाषान्तरेण भवितुं ज्ञातुं च शक्यते । कथम्? भाषान्तरीकरणे तत्कर्तॄणां वाङ्मनोबुद्ध्यादिसंस्कार-सामर्थ्याद्यनुसारेण तत्तदर्थानामपि अर्थान्तरीकरणसम्भवात्, क्वचिदनर्थान्तरदोषादिसम्भवाच्च ।

तस्माद्वरं मूलसंस्कृतशब्दावलम्बनेनैव तदर्थज्ञानादिसम्पादनमिति सर्वसम्मतमेवैतत् । अत एव भट्टमोक्षमुल्लर-मेग्डोनालप्रभृतिभिः पाश्चात्यपण्डितैरपि वैदेशिकैर्भाषान्तराभिज्ञैरपि संस्कृतव्याकरणाद्यनुसारेणैव मूलवेदमन्त्राक्षराणां संस्कृतशब्दानां च व्युत्पत्त्यादिज्ञाने तत्संशोधने तत्प्रकाशने च विधृतः प्रयत्नः सार्थकतामुपप्रापेति सुविदितमेव विदुषाम् ॥

अपि च देशान्तरीयाः प्रदेशान्तरेषु निर्गताः सन्तः बहोः कालात् पश्चात् यद्यपि स्वकीयां मूलां मातृभाषां विस्मरेयुः तत्तद्देशीय-भाषान्तरशिक्षणवातावरणाद्यावृताः, तथापि स्वदेशीयानां स्वबान्धवानां समागमे संवदन्ति किल— वयं देशान्तरीयभाषावलम्बनेन मूलां मातृभाषां न जानीमः नापि स्मरामः, क्वचित् किञ्चित् किञ्चित् स्मराम इति च, क्वचित् केचित् खिद्यन्ते च पश्चात्तापेन । तथापि तत्परिज्ञानेन तदभिमानेन गौरवं कुर्वन्त्येवेति लोकव्यवहारसिद्धं एवेदम् । तद्वदेव विस्मृतायामपि सर्वभाषामूलभूतायां संस्कृत-भाषायां स्वस्वकीयमातृभाषारूपाणां प्राकृतभाषाणां प्राकृतशब्दानां च व्युत्पत्त्यादिना संशोधनेन तन्मूलभूतं संस्कृतशब्दादिप्रत्ययं प्राप्नुवन्त्येव समदृशा विविदिषवो विद्वांसश्च ॥

अनेनैव न्यायेन सर्वभाषामूलभूतायाः मूलमातृभाषारूपायाः संस्कृतवाण्याः विस्मरणेन स्वस्वमातृभाषायाः देशभाषायाः प्रादेशिक-भाषाणां च अभिनिवेशेन एतामेव सर्वार्थसाधनसमर्थां भावयन्तः सम्प्रति तादृशीमेव दशां सर्वे वयं प्रतिपदमनुभवामः सङ्कुचित-दृष्टिविष्टब्धाः ॥

अत्र केचिदेवं प्रतिवदन्ति केवलं तात्त्विकदृशा तत्त्वार्थैकज्ञान-कामाः तात्त्विकविद्यैकप्रियाः तात्त्विकैकार्थवादिनः 'वक्रः कृष्णो यद्यपीक्षुः कृशः सः स्वादुः शुद्धो माधुरः सद्रसाप्तः । तद्वद्वाचि

प्रकृतायामपीष्टं सर्वं ज्ञानं सर्वथा स्यात्समानम्' ॥ तद्यथा— वक्रे कृष्णे कृशेऽपि इक्षुदण्डे स्वादुः मधुरः सन् सद्रसो यथा अन्तर्हितो गुप्तः तिष्ठति, तथैव प्राकृतभाषायामपि तत्त्वज्ञानं सर्वं तत्समानमेव भवितुं अर्हति, भाषान्तरीकरणेन शब्दरूपपरिणामेऽपि तत्त्वं तात्त्विकोऽर्थः नैव विपरिणमते इति सर्वानुभवसिद्धम् । तस्मात् तत्त्वज्ञानादिप्राप्तये संस्कृतादिभाषादरो नास्तीति भावः । एवं भक्तिभावेऽपि तत्समानमेव स्तोत्र-भजन-नामस्मरणादौ लक्ष्यार्थरूपध्येयैकवस्तुतत्पराणां तद्वस्तु-ध्यानैकपरायणानामिति । अत्रोच्यते— वेदमन्त्राणां संस्कृतादीनां मूलशब्दानां भाषान्तरेणापि तत्त्वज्ञानोदयसम्भवेऽपि व्याख्यानेन विशिष्टार्थप्रतिपत्तियोगेऽपि तेषां संस्कृतादिमूलशब्दानां मूलप्रकृतिः तत्स्वरूपं च विपरिणमते, शब्दशक्तिर्विक्रियते, क्वचिदपक्षीयते च इति निर्विवादं प्रत्यक्षसिद्धं च । अर्थात् तत्तच्छब्देष्वेव काचिदलौकिकी शक्तिः प्रतितिष्ठतीति भावः । तस्मात् तत्तत्सद्वस्तुवाचकसंस्कृत-वैदिकादिशब्दव्युत्पत्त्यादिमुखेनैव तत्तद्वाच्यार्थरूपवस्तुज्ञानं तदर्थ-सम्पादनं विशिष्टबुद्धिसत्त्वादिप्रकाशनं च भवितुमर्हतीति प्राचां शब्दप्रामाणिकानां सिद्धान्तः ॥

तादृशी व्युत्पत्तिरपि व्याकरणादिशास्त्रमुखेनैव भवितुं शक्या । 'समर्थः पदविधिः । अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । भूवादयो धातवः' इत्यादिभिः सूत्रैः पाणिनीयप्रतिज्ञामुखेन निर्देशात् । सत्ता-ज्ञान-क्रियादिशक्तिसम्पत्तिपूर्विकैव हि शब्दादिव्युत्पत्तिर्यथार्थ-वस्तुस्वरूपतत्त्वादिबोधकारणं भवति । तत्रापि अक्षर-स्वर-शब्द-पद-वाक्यादिकमप्युपकरणमिति प्रतीयते ॥

अपि च अलौकिकेषु उपनयनादिषु संस्कारेषु वैदिककर्मसु यज्ञादिषु च वैदिकमन्त्राणामेव विनियोगः, संस्कृतशब्दानामेव प्रयोगश्च अलौकिकं किञ्चिद्विशिष्टमपूर्वं जनयितुमर्हतीति शब्दशक्ति-

तत्त्वविदां राद्धान्तः । तद्यथा— वेदादिसर्वविद्याशिक्षणार्थं द्विजत्वसिद्धये च अनिवार्यतया प्रथमकर्तव्यतया वेदविहिते प्रधान-संस्काररूपे उपनयने प्रथमे ब्रह्मोपदेशे सुविहितो गायत्रीमन्त्रः सर्वत्र सुप्रसिद्धः 'गायत्र्या ब्राह्मणमुपनयीत' इति तद्विधानात् । तदनुसारेण तद्गायत्रीमन्त्रोपदेशोऽपि मनु-वसिष्ठ-विश्वामित्रादिमहर्षीणां तथाऽन्येषां पूर्वाचार्याणामपि सदाचारपरम्परया अनादिकालादद्यावधि सर्वत्रापि प्रचलितः प्रसिद्धतरः प्रत्यक्षसिद्ध एव सर्वेषाम् ॥

सोऽयं गायत्रीमन्त्रः तथैवान्यः सर्वोऽपि मन्त्रगणः प्रत्यक्षब्रह्म-रूपो ब्रह्मसञ्ज्ञकः यथाश्रुतं यथोपदेशं अक्षराद्यानुपूर्व्येणैव उपदेष्टव्यः अनुश्राव्यः उच्चारणीयः जपनीयश्चेति अस्ति वेदशास्त्राद्यनुशासनम् । तद्वैपरीत्येन तदुपदेशाद्यनुष्ठाने न तु तच्छास्त्रीयतामर्हतीति विधानात् । अथ तन्मन्त्रार्थज्ञाने भाषान्तरेणापि तद्व्याख्यानाद्युपदेशस्य औचित्येऽपि मन्त्रोपदेशे तु यथाश्रुतमेव तन्मन्त्राक्षरावलम्बनमेव शास्त्रीयतापादकमिति सर्वशास्त्रतत्त्वम् ॥

तत्र तन्मन्त्रार्थसमर्थनसामर्थ्ययुक्तेन संस्कृत-प्राकृतादिशब्द-भाषाप्रबद्धेन श्लोकादिना कृतो ब्रह्मोपदेशः स्वयमशास्त्रीय एव स्यात् । तद्यथा— 'तद्वरेण्यं परम्ब्रह्म परञ्ज्योतिः स्वरूपकम् । सवितुर्देव-देवस्य ध्यायामो धीप्रचोदकम्' । यद्यपि अयं गायत्रीमन्त्रार्थगर्भितः सन्नपि संस्कृतश्लोकः तदर्थावबोधसमर्थः परब्रह्मवस्तुतत्त्वज्ञानोदयार्थकः तथापि उपनयने तु न ब्रह्मोपदेशार्हः इति सर्वानुमतेन सिद्धः इति स्पष्टतरोऽर्थः ॥

एवमेव संस्कृतश्लोकादीनां अक्षरशो भाषान्तरीकरणेन तथा तच्छाययैव प्राकृतश्लोकादिनिर्माणेन ग्रन्थादिरचनेऽपि न तु तज्जप-पारायणाद्यर्हतामुपैति । यथा वाल्मीकिरामायणादिकं पारायणार्हं न तु तथा तदर्थगर्भितमपि रघुवंशादिकाव्यादिकं पारायणार्हम् ॥

तस्मात् सर्वत्रापि वैदिककर्मसु यज्ञादिषु च मन्त्राणामुपदेशादि-विनियोगः संस्कृतशब्दानां प्रयोग एव शास्त्रीयतामर्हतीति प्राचां महर्षीणामाचार्याणां च सदाचारपरम्पराप्राप्तं तदिदं सर्वसम्मतमेव तत्त्वम् । तत्रेदमौपनिषदं वचनं प्रमाणम्— 'तदेतत् सत्यम् । मन्त्रेषु कर्माणि कवयो यान्यपश्यन् तानि त्रेतायां बहुधा सन्ततानि तान्याचरथ नियतं सत्यकामाः एष वः पन्थाः सुकृतस्य लोके' इति (मुं० अ० १-२) । तत्रायं ऋङ्मन्त्रवर्णः पूर्वेषां दिव्यदृशां मार्गदर्शनानुसरणबोधकः 'पूर्वेषां पन्थामनुदृश्य धीरा अन्वालेभिरे रथ्योऽन रश्मीन्' इति (ऋक्) । तत्रायं प्रत्यक्षदर्शितो दृष्टान्तः ॥

यथा खलु निरवधिके व्योमनि ऊर्ध्वं तपसा अनवरतं प्रज्वलतो ज्योतिरात्मनः सवितुः सकाशात् प्रसृतानि तेजः किरणान्यनुसृत्य अतिदूरे अधस्तने अत्र भूमण्डले विद्यमानाः मानवाः साक्षादेव अग्निं प्रापुः, तथैव इदानीमपि प्राप्नुवन्ति । तद्वदेव मूलसंस्कृतादिदिव्य-शब्दैरेव सर्वार्थप्रत्ययोदयात् साक्षादेव तद्वस्तुलाभादिकं भवितुमर्हतीति सङ्गच्छते । तत्र मूलसंस्कृतशब्दाद्यवलम्बनमनिवार्यमेव नान्यथा सिद्धम् ॥

तत्त्वज्ञानेपि तत्समानमेव । तद्यथा— परोक्षब्रह्मात्मादिवस्तु-तत्त्वावगमार्थं ब्रह्मशब्दादिव्युत्पत्त्या भाषान्तरीकरणेन तदर्थोपदेशाय हिन्दीप्रभृतिप्राकृतभाषया व्याख्यानावसरे 'बड़ा—मोटा—मोठा' इत्यादिशब्दानां अर्थस्वरूपं सद् बृहद् वस्तु किं तदित्याकाङ्क्षायां तदुपदेशे तु तद् ब्रह्मेत्येव वक्तव्यमापतति । तस्य प्रधानं सञ्ज्ञानुकरणं सर्वभाषास्वपि मूलसंस्कृतशब्दानुसरणं सर्वथा समानमेव भवति । भाषान्तरीकरणेऽपि नामपदानि न तु विपरिणमन्ते नापि भिद्यन्ते इत्यर्थः ॥

तद्वदेव 'ॐ खं ब्रह्म । ओमिति ब्रह्म । ओमित्येकाक्षरं ब्रह्म । तस्य वाचकः प्रणवः' इत्यादिवचनैरुपदिष्टस्य ब्रह्मणोवाचकस्य प्रणवाक्षरस्य संस्कृतभाषया वा प्राकृतभाषया वा प्रवचने व्याख्याने च 'ॐ' इत्येतदनुकरणं सर्वत्रापि समानमेव, न तु कुत्रचिदपि भिद्यते नापि विपरिणमते 'ओमित्येतदनुकृति' इति तदनुकरणानुश्रवणात् । 'तदेतदनुज्ञाक्षरं विद्धि' इत्यादिकमुपनिषद्वचनमपि तदेव समर्थयति ॥

एतेनैव न्यायेन गुप्तप्रणवाक्षरस्य ईङ्कारादेरनुकरणमपि सतत्त्वं व्याख्यातं वेदितव्यम् । तथा च यजुर्मन्त्रवर्णः 'ईङ्का॒राय॒ स्वाहा॑ । ईङ्कृ॑तये॒ स्वाहा॑' इति ॥

एवमेतेषां सर्वेषामपि मूलप्रमाणभूतं तापसार्षेयं ऋङ्मन्त्र-दर्शनम्— 'याव॒द् ब्रह्म॒ विष्ठि॑तं॒ ताव॑ती॒ वाक्' इति (ऋ० १०) । तस्येदमुपव्याख्यानं ऐतरेयमारण्यकं ब्राह्मणवचनम्— 'यत्र क्व च ब्रह्म तद्वै वाक् । यद्वै वाक् तद्वा ब्रह्मेत्येतदुक्तं भवति' इति । तदेतत्सर्वरहस्यार्थोन्मथनेन मङ्गलमुखेन वागर्थात्मकौ तौ भगवन्तौ जगत्पितरौ पार्वतीपरमेश्वरौ अभिवादयते कवितामुखे भवान् कवीन्द्रः कालिदासः— 'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये । जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ' इति ॥

तस्मात् प्राकृतादिभाषान्तरेण तत्त्वज्ञानोदयेऽपि तथा स्तोत्र-भजनादिसम्भवेऽपि तत्र मूलभूतं वैदिकमनादिसिद्धमनन्तस्वरूपं संस्कृतं शब्दजातमेव नामपदादिकं वस्तुवाचकमेव सर्वथा शरणमिति सम्पद्यते, तद्यथा शिव-नारायण-राम-कृष्णादिसंस्कृतशब्दानां नामपदानां सर्वभाषास्वपि समानमेव समाश्रयणम् ॥

एवं नामरूपाभ्यां व्याकृतमिदं सर्वं जगत् ब्रह्मादिस्तम्बपर्यन्तं सर्गादौ जायमानं सत् परमात्मनः सर्वज्ञात् सर्वशक्तेः तस्यैव

पराशक्तिरूपायाः वाक्छक्तेः सकाशाद् वाङ्मुखादेव प्रादुर्बभूवेति श्रूयते । तथा च कुत्सार्षेयं ऋङ्मन्त्रदर्शनम्— 'स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळं धत्त विश्वा । आपश्च मित्रं धिषणा च साधन्॰' इति (ऋ॰ १-९६-१) 'स पूर्वया निविदा कव्य-ताऽयोरिमाः प्रजा अजनयन् मनूनाम्' इति च (ऋ॰ १-९६-२) ॥

अपि च तेभ्यो वैदिकेभ्यो दिव्येभ्यः संस्कृतशब्देभ्य एव इमानि सर्वाणि भूतानि स्थावरजङ्गमान्तजीवजातसहितानि सृष्टेरादितः प्रादुर्बभूवुरित्यनुश्रूयते 'स भूरिति व्याहरद् भूमिमसृजत' इत्याद्यनुश्रवणात् ॥

तथैव वाच्यार्थस्वरूपे परोक्षे नित्यसिद्धे परमे सत्यवस्तुनि पुनर्विलीयन्ते तानि नामरूपात्मकानि सर्वाणि भूतानि, तत्र विनष्टेष्वपि प्रत्यक्षेषु एतेषु समस्तेषु भूतेषु तानीमानि नामशेषतामेवोपगच्छन्ति, स्वस्ववाचकनामात्मनैवावशिष्यन्ते इति यावत् । येभ्यः स्वस्व-वाचकेभ्यः वैदिकसंस्कृतादिदिव्यशब्देभ्यः आविर्भूतान्यासन्, तानि सर्वाणि भूतानि अन्ते पुनः स्वस्वनामान्येव प्रतिसंविशन्ति, तत्तन्नाम्नैव प्रतितिष्ठन्तीति यावत् । एतेन वागर्थयोः नामरूपात्मकयोः शब्दार्थयोः नित्यः सम्बन्धः स्वतःसिद्ध एवेति सम्पद्यते ॥

एवं नामरूपात्मना समभ्युदितस्यास्य सर्वस्यापि जगतो मूलकारणीभूतस्य सर्वनामरूपाधिष्ठानभूतस्य परमात्मनोऽपि तत्त्वज्ञानं जगद्-ईश-जीवात्मनां सामरस्येन योगेन वागर्थप्रतिपत्तिपूर्वकमेव भवितुमर्हतीति सिध्यति । तथा चायं मन्त्रवर्णः तमेवार्थं प्रतिपादयति नामरूपतादात्म्येन श्रवण-दर्शनरूपेण उपासनात्मकेन साधनेन, तदिदं गौतमार्षेय ऋङ्मन्त्रदर्शनं शान्ति-मङ्गलाद्यनुमन्दर्शनम्— 'भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः' इति (ऋ॰ १-८९-८) ।

'तदेतत् दृष्टं च श्रुतं चेत्युपासीत । चक्षुष्यः श्रुतो भवति' इति च औपनिषदं ब्राह्मणवचनं सामगानाम् (छां० उ० ३) ॥

अत एव तत्तद्वाच्यार्थज्ञानाय तत्सत्यवस्तुविज्ञानाय च प्रत्यक्ष-ब्रह्मरूपस्य शब्दब्रह्मणः वाग्रूपस्य नाम्नो मन्त्रादेश्च समवलम्बनेन जप-ध्यान-स्मरण-यजन-भजन-उपासनादिकं सुविहितं साधनमप्यनु-श्रूयते । तथा च शौनःशेपार्षेयं ऋङ्मन्त्रदर्शनम्— कस्य नूनं कतमस्यामृतानां मनामहे चारु देवस्य नाम । अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारु देवस्य नाम' इति (ऋ० १-२४-१-२) ॥

अत्र तत्तद्वस्तुस्वरूपज्ञानपूर्वकमेव जपादिसाधनं समन्त्रकमेव यज्ञाय वैशिष्ट्याय च कल्पते इति आर्षेयं वैदिकं तत्त्वम् । तस्मिन्नर्थे दैर्घतमसार्षेयं मन्त्रदर्शनम्— 'तमु॑ स्तोतारः पू॒र्व्यं यथा॑ वि॒द ऋ॒तस्य॒ गर्भं॑ ज॒नुषा॑ पिपर्तन । आस्य॑ जा॒नन्तो॒ नाम॑ चिद्विवक्तन म॒हस्ते॑ विष्णो सुम॒तिं भ॑जामहे' इति (ऋ० १) ॥

अस्मिन्नर्थे नारदाय सनत्कुमारेणोपदिष्टं औपनिषदं वचनं नामरहस्यार्थकं 'नाम वा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः' इत्यादि सर्वार्थसाधकस्य शब्दब्रह्मरूपस्य नाम्नो निर्देशः । अथ तदुपासनोपदेशोऽपि भवति सर्वत्र स्वतन्त्रवृत्तिफलार्थकः 'नामैवैतत् नामोपास्व, स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य कामचारो भवति' इति (छां० उ० ७-१-५) ॥

तदिह अर्थज्ञानाद्यभावेऽपि श्रद्धाभक्त्यादिविरहेऽपि केवलं प्रत्यक्षसिद्धशब्दब्रह्मावलम्बनेन तस्मिन्नेव तत्परं वस्तुज्ञानं तत्स्वरूपं च स्वयमेवाविर्भवितुमर्हति इति भावः । वस्तुतस्तु तादृशार्थज्ञानाद्युदयेन तत्परमवस्तुप्राप्त्यर्थमेव तदज्ञानिनामपि तन्नाम-शब्द-मन्त्राद्यवलम्बनो-पदेशः शास्त्रविहितः 'शब्दब्रह्मणि निष्णातः परम्ब्रह्माधिगच्छति'

इति याज्ञवल्क्यवचनात् । तदिह परोक्षपरवस्तुप्राप्तये प्रत्यक्षशब्दब्रह्म-रूपं नाम-मन्त्रादिकमेव प्रधानमवलम्बनमिति सिध्यति । तथा च काठकमौपनिषदं वचनम्— 'सर्वे वेदा यत्पदमामनन्ति० .... तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतत् । एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्' इति च स्पष्टं निदर्शनम् ॥

अर्थज्ञानाद्यभावेऽपि मन्त्रादिशब्देष्वेव तत्कार्यकारित्वशक्तिरस्ति इत्यर्थे मूलभूतं प्रमाणवचनं तु ऋङ्मन्त्रे प्रसिद्धम्— 'अमन्यमानाँ अभिमन्यमानैर्निर्ब्रह्मभिरधमो दस्युमिन्द्र' इति (ऋ० १) ॥

तस्यायमर्थः— हे इन्द्र, 'अमन्यमानान्' अज्ञान् अर्थ-ज्ञानादिरहितानपि 'अभिमन्यमानैः' अभिमानेन स्वात्मीयभावेन अज्ञानामपि निजजापकानां भजकानां रक्षणार्थं प्रवृत्तैः स्वतःसिद्धैः सर्वार्थसाधनसमर्थैः 'ब्रह्मभिः' ब्रह्मवाचकैः प्रत्यक्षब्रह्मरूपैः मन्त्रैः 'दस्युं' अन्यविनाशकं दुष्टं दुर्विषयकं 'निरधमः' त्वं निःशेषेण समुत्सारितवानसि इति । एतेन प्रत्यक्षब्रह्मणि शब्दात्मके मन्त्रे एव तदर्थसाधनसामर्थ्यं स्वतःसिद्धमेवेति सङ्गच्छते । सोऽयं सामान्यतः सर्वसाधारणो नियमः शब्दशक्तितत्त्वसिद्धः । विशेषतस्तु अर्थज्ञान-साहित्येनैव शब्दाद्यवलम्बनं महते फलाय भूयसे वैशिष्ट्याय च कल्पते इत्येव वस्तुसिद्धं शब्दार्थसत्त्वम् ॥

तयोर्वागर्थात्मकयोर्नामरूपयोः वाचक-वाच्यार्थवस्तुस्वरूपयोः शब्दार्थयोः तादात्म्यान्नित्यसम्बन्धात् अयुतसिद्धवृत्तित्वाच्च तयोः एकतरस्य परित्यागेन अन्यतरस्य एकस्यैव समाश्रयणे तु अपूर्णतां असार्थकतां च दर्शयन्ति शास्त्रतत्त्वविदः, युक्ततममेवेदं यथार्थं शास्त्रतत्त्वं, सर्वप्रामाण्यार्थसत्त्वकमिति प्रतिज्ञायते । 'यः एकैक-मुपास्ते न स वेद' इति (बृ० उ०) याज्ञवल्क्यदर्शितेन औपनिषदवचनोपबृंहितेन शास्त्रीयन्यायेनापि तथैव सिध्यति । एतेन

सर्वस्माद् वरं युक्ततरं श्रेयस्करं च अर्थज्ञानपूर्वकमेव श्रेष्ठं शब्दावलम्बनमिति सम्पद्यते ॥

तस्माद् वागर्थयोस्तयोः अर्थज्ञानराहित्ये तदर्धाङ्गपरित्यागे च न तु तद्यथोक्तपूर्णफलार्हं भवतीति प्रतिषिद्धमनुश्रूयते । तथा च बार्हस्पत्यार्षेयं ऋङ्मन्त्रदर्शनम्—

'यस्तित्याज॑ सचि॒विदं॑ सखा॑यं॒ न तस्य॑ वा॒च्यपि॑ भा॒गो अ॑स्ति ॥
यदीं॑ शृ॒णोत्यल॑कं शृ॒णोति॒ न॒ हि प्र॒वेद॑ सुकृ॒तस्य॒ पन्था॑म् ॥'

(ऋ० १०-७१-६)

तस्यायमर्थः— यः खलु मित्रवदुपस्थितं वाचि सखिवदेव नित्यसम्बन्धेन समन्वितं सखिरूपमर्थं परित्यजति, वाङ्मात्रावलम्बनेन सार्थकतां मन्वानस्य तस्य तस्यां केवलायां वाचि अर्थज्ञानरहितायां सम्यग् गृहीतायामपि फलभागो नास्ति, अर्थज्ञानविरहिता सा वाग् यथोक्तपूर्णफलप्रदानसमर्था न भवतीति यावत् । अथ पुनर्यद्यपि अर्थज्ञानशून्यामपि तामेतां वाचं प्रत्यक्षमेव शृणोति तथापि 'अलकं' निरर्थकमेव शृणोति, अर्थज्ञानशून्यत्वात् तस्याः श्रवणं निरर्थकमेवेति भावः, तस्मात् सः पुरुषः 'सुकृतस्य' अर्थज्ञानसाहित्येनैव शब्दावलम्बनादिसार्थकतायाः मार्गं न हि सम्यग् विजानाति तदेकदेशाश्रयणात् ॥

इममेवार्थं स एव ऋषिः स्पष्टार्थतया श्रावयति मन्त्रान्तरमुखेन 'उ॒त त्वः॒ पश्य॒न् न द॑दर्श॒ वाच॑मु॒त त्वः॑ शृ॒ण्वन् न शृ॑णोत्येनाम्' इति (ऋ० १०-७१-४) ॥

अस्मिन्नेवार्थे सुस्पष्टतरार्थानुवादिनी यास्कनिरुक्तोदाहृता गाथा भवति— 'स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् । योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा' इति ॥

एवमेव प्रत्यक्षब्रह्मरूपाणां प्रधानप्रमाणभूतानां ऋगादीनां वाचामवलम्बनेन तेषां ऋगादिसमग्रवाङ्मयानां तथा सर्वेषामपि जगतां निदानभूतस्य परमसत्याक्षरवस्तुनः परमात्मनः विज्ञानेनैव सर्वसार्थकतां अमृतत्वोदितां कृतकृत्यतां च दर्शयन्ति महर्षयो मन्त्रमुखेन । तथा च दैर्घतमसार्षेयं ऋङ्मन्त्रदर्शनं तदुभयार्थसन्दर्शकम्—

'ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥'

(ऋ० १-१६४-३९)

अस्यायमर्थः — 'ऋचः' ऋगादीनां समग्रशब्दराशीनां मूलभूते वागात्मके वाचके प्रणवसञ्ज्ञके 'अक्षरे' तथा तद्वाच्यार्थरूपे लक्ष्यार्थस्वरूपे अनिर्वाच्ये 'परमे व्योमनि' व्योमवद्व्यापके अक्षरात्मके सत्ये ब्रह्मणि 'यस्मिन्' परोक्षे वस्तुनि परमात्मनि 'विश्वे देवाः' देवादीनि सर्वाणि भूतानि च प्रतितिष्ठन्ति, 'यः' तत् परं वस्तु न जानाति सः केवलेन तेन वाग्रूपेण ऋगादिना शब्दमात्रेण किं कर्तुं शक्नुयात्, ये तु खलु तत्परमं अक्षरं वस्तु जानन्ति ते एव तेन सत्येन पूर्णेन अक्षरात्मना सर्वात्मना चिरं सम्राजन्ते, इति तेषां अर्थज्ञानामेव सार्थकता पूर्णता चेति निर्गलितोऽर्थः ॥

तस्मात् सर्वज्ञानार्थं सर्वक्रियाशक्तिसम्पत्तये सर्वविद्याप्रतिपत्तये आत्मशान्तये विश्वकल्याणाय स्वस्वकर्तव्यतानिर्वहणाय च सर्वेषां मानवानां सेयं संस्कृतभाषात्मिका भारती वाङ्मातैव सर्वथा शरणमिति सम्पद्यतेतराम् ॥

एवं तदिदं वैदिक-संस्कृतशब्दानां संस्कृतदेववाण्याः महत्त्वं विदुषामपि अनिर्वचनीयमेव सत् कल्पनातीतमिति निर्विवादम् । अत्र स्वल्पाक्षरेऽपि संस्कृते शब्दे तस्मिन्नर्थबाहुल्यं, अतिरहस्यार्थगर्भितं ज्ञान-विज्ञानादिसाकल्यं, श्रवणोच्चारणादिमात्रेणापि माङ्गल्यमयं,

स्तवनमुखे शान्ति-मधुर-मनोहरादिरसमयं, साम-सङ्गीतादिगानमुखे सत्स्वर-संविदादिसामरस्ये च परमानन्दादिसद्रसमयं, एवमादिभिः सद्गुणगणैः अनन्यसाधारणं सर्वसत्त्वमयं तत्संस्कृतं वाङ्मयं, अपि च कवितालङ्कारादिकलामयं रसिकानामपि अनुपमेयं असमानमेवान्यैः वाङ्मयैर्भाषान्तरीयैः शब्दैः सर्वैः शब्दसाहित्यैरपीति, सर्वैरपि वाङ्मयैः समानं सर्वसम्मतं च स्वरसतः सरलं, विशिष्टविविधादिरसतो विरलं चेति प्रतीयते । तस्मिन् अस्मिन् संस्कृतवाङ्मये स्वरवर्ण-पदादिलालित्यं, स्वरसौष्ठवं वर्णमार्दवं भावमाधुर्यं अनुभावादिगाम्भीर्यं च स्वभावतः सिद्धं तत् सर्वैरपि श्रवणीयं संस्मरणीयं संस्पृहणीयं अनुकरणीयं च भवति । तत्रापि संस्कृते शब्दे वाङ्मये च अधिभौतिकाद्यनेकतत्त्वार्थगर्भितं नित्यनूतनसत्त्वोल्लासादिगुणगणप्रकृष्टं रसस्वरादिसत्त्वं, नवनवतरार्थादिसंवित्स्फुरणप्रतीकं, नवनवानुभावो-न्मेषणादिकलागुणादिप्रकृतिकं, वाच्यार्थ-लक्ष्यार्थध्वन्यार्थादिबोधक-गुणादिरूपकं, नवरसादिविचित्रतरविविधभावोद्बोधकं, वाचकता-स्वभाव-गुण-क्रियादिशक्तिकपदसामर्थ्यादिसंविद्रसादिपरिपूर्णं सर्वं संस्कृतं वाङ्मयसाहित्यमिति प्रतीयते ॥

यदि तावत् कश्चित् संस्कृतवाचो महत्त्वं तत्स्वरूपसत्त्वं च विजानीयात्, किञ्चिन्मात्रमपि तद्वाग्रसमनुभवेत्, अवश्यमेव तदभिरुचेः तदभ्यासादिसद्व्यसनं परित्यक्तुं न प्रभवेत् इति प्रतिज्ञायते । तथा क्वचिदुत्तरत्रापि पुनः स एव पश्चात्तापपात्रं भवेत्— एतावत्पर्यन्तं व्यर्थमेव मम जीवितं व्यतीतमिति, वैदिक-देववाणीस्वररसादिपूर्णायाः सरस्वत्याः तत्संस्कृतवाग्रसास्वादादिभिर्वञ्चितोऽस्मीति ॥

तद्यथा कवीन्द्रस्य 'वागर्थाविव सम्पृक्तौ' इत्यादिकवितासु वस्तुसिद्धं वागर्थसत्त्वं समग्रस्यापि शब्दराशेर्ज्ञान-विज्ञानादिसारभूतं, एवमेव प्रत्यक्ष-परोक्ष-अपरोक्षादिवस्तुसिद्धेषु अधिभौतिक-अधिदैविक-

अध्यात्मकादितात्त्विकविषयेष्वपि वैज्ञानिकानां प्रत्यक्षभौतिकवादिनां सद्यःफलप्रदं प्रत्यक्षसिद्धं वस्तुतत्त्वं, ईश-देवतादिभक्तियोगैकनिरतानां भाविकानां श्रेष्ठं श्रद्धेयं परोक्षतत्त्वं, अन्तर्निष्ठानामध्यात्मवादिनां ब्रह्मात्मवादिनां च शान्ति-शक्ति-रसादिपूर्णं अपरोक्षतत्त्वं च वागर्थ-सामरस्येन तत्त्वत्रयसत्त्वादिसामरस्येन च एकस्मिन्नेव मन्त्रे श्लोके एकस्मिन् संस्कृते शब्देऽपि सर्वज्ञत्वकलादिपूर्णः सर्वशक्तियोगाभ्युदीर्णः सर्वार्थप्रत्ययः समान एवेति महद्विचित्रमिदं विस्मयास्पदं प्रहर्षप्रदं च तस्याः संस्कृतवाग्रूपायाः भारत्याः माहात्म्यं चिरं स्मरणीयमेव सर्वैरपि इति, तदिदं महद्भूषणं सौभाग्यमेवास्माकं श्रीसंस्कृतभारतीसम्भावितानां सर्वेषां भारतीयानामित्येव सम्भाव्यते ॥

एवमाद्यनेकदिव्यार्थतत्त्वगर्भितं दैर्घतमसार्षेयं ऋङ्मन्त्रदर्शनमेव तत्रोदाहरणम्—

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥'

(ऋ० १-१६४-२७)

तस्यायमर्थः— अत्र मित्रत्वेन सदैव संयुतौ द्वौ पक्षिणौ एकं वृक्षमधितिष्ठतः, तयोरेकः पक्वं फलं भुनक्ति, अन्यस्तु अनश्नन्नेव तूष्णीं तिष्ठन् पश्यति, इति सामान्यतः शब्दार्थः, रूपकालङ्कार-संहितोऽयं शब्दसाहित्यविशारदानां विचित्रतरार्थप्रत्ययहेतुभूतः महदानन्दास्पदीभूतश्चेति स्पष्टम् । अथ 'त्रयोऽर्थाः सर्ववेदानाम्' इति वचनानुसारेण एतेषां संस्कृतशब्दानां अधिभौतिकादितत्त्वयोगेन पृथक्पृथग्रूपार्था भवितुमर्हन्ति इत्युन्नीयते, तेषामियं प्रतिच्छाया— अत्र एकस्मिन् वृक्षे प्रत्यक्षेस्मिन् प्रपञ्चे सर्वेषां समाने वृक्षवदुपस्थिते अधिभूततत्त्वोद्भूते अचेतने विश्वस्मिञ्जगति द्वौ 'सुपर्णौ' सुपर्णवत् सम्पन्नौ पक्षिरूपिणौ सचेतन-प्रचेतनात्मानौ जीवेशौ, 'सयुजौ'

परस्परसहयोगान्वितौ, 'सखायौ' अन्योन्यं मित्रत्वान्वितौ, स्वकीयं शरीरं विश्वं च स्वात्मीयतया अधितिष्ठतः, तयोर्मध्ये 'अन्यः' जीवात्मा तद्वृक्षस्य अस्य विश्वस्य शरीरस्य च स्वादिष्ठं परिपक्वं फलं स्वकर्मफलरूपं सुखदुःखादिकं उपभुनक्ति, स्वरसतः तत्फलं सेवते, अन्यः ईशस्तु तत्र सर्वसाक्षित्वेन वर्तमानः उदासीन इव आसीनः तटस्थः कूटस्थनित्यः तत्सुखदुःखादिफलमनश्नन् नित्यतृप्तत्वात् स्वयमभोक्तैव सन् सर्वमिदमभिचष्टे, इत्यादिरूपकालङ्कारपरिपूर्णोऽयं मन्त्रवर्णः महद्गम्भीरार्थानुभावोदीर्णः तत्त्वत्रयसामरस्यसंवित्सत्त्वपूर्णः इति स्पष्टम् ॥

तमिममेकमेव मन्त्रमाश्रित्य स्वस्वमतिप्रकाशितेन ज्ञानादियोगेन अद्वैत-विशिष्टाद्वैत-शुद्धाद्वैत-द्वैत-पूर्णाद्वैतादिरूपं सदर्थं प्रतिपादयन्तः शङ्कर-रामानुज-वल्लभ-मध्वप्रभृतयः पूर्वाचार्याः जगद्-ईश-जीवात्म-सत्त्वपूर्णेन परमात्मतत्त्वज्ञानेन तदुपासनादिना पूर्णानुभवेन ते महानुभावाः सम्पूर्णजीवितस्य सार्थकतां भावयन्तः तत्प्रचारादिना तत्संस्कृतवाग्रसरहस्यं प्रकाशयन्तः आजीवनं शरीरयात्रामनुनयन्तः कृतकृत्यतापदवीमधिरूढाः कीर्तिशेषाः सन्तः सर्वत्रापि सदैव सम्राजन्ते, तदिदं सत्त्ववैशिष्ट्यं माहात्म्यं वैचित्र्यं च समानरूपेण सर्वाश्रयणीयत्व वेदवाण्याः संस्कृतरूपायाः सुरभारत्याः इति चिरमनुचिन्तनीयं नित्यमनुसन्धेयं च महत्त्वाकाङ्क्षिभिः संस्कृतसद्विद्याभिलाषिभिः सर्वैरपि मानवैरिति सर्वं सुसम्पन्नम् ॥

एवमेव भारत-रामायण-भागवतादिसंस्कृतवाङ्मयमुखेन तत् संस्कृतवाग्रससत्त्वप्रवर्षकाणां तत्साहित्यादिरहस्यार्थज्ञानप्रकाशकानां व्यास-वाल्मीकि-बोपदेवप्रभृतीनां, तथा तत्संस्कृतवाग्रसिकानां भोज-कालिदास-भवभूतिप्रभृतीनां कवीन्द्राणामपि महानुपकारोऽयं संस्मरणीयः भवदीयैर्भवद्भिः अस्माभिः सर्वैरपि भारतीयैरिति

सम्भावयामि । तथैव तेषां मार्गदर्शनानुसारेण महदनुभावसारेण तत्समादरेण संस्कृतभारतीमातृसेवां निर्वोढुं निर्वर्तयितुमर्हन्ति भवन्तः इति सर्वान् सम्प्रार्थये ॥

सम्प्रति प्रस्तुतेऽस्मिन् कलिकाले संस्कृतभारतीतत्त्वस्य प्रकाशनेन विश्वकल्याणार्थं प्रस्तुतोऽयं 'संस्कृतविश्वपरिषत्समारम्भः' स्वकीयं इदं परमं ध्येयं अचिरादेव साधयितुं प्रभवतु निखिलजगदध्यक्षस्य परमैश्वर्यपरिपूर्णस्य श्रीभगवतो राजेन्द्रस्य प्रसादादिति सर्वच्छन्दसां वर्षकं छन्दोमुखेनैव आविर्भूतं तं राजेन्द्रमेव छन्दोमुखेन समभ्यर्थये 'स घा राजेन्द्र आर्दभन्नः' इति ॥

तथैव पुनः श्रीभारताध्यक्षस्य महानुभावस्य संस्कृतविश्वपरिषदध्यक्षस्य 'श्रीराजेद्रप्रसादस्य' समाश्रयणेन संयोजनेन च संस्कृतविद्याभ्युदयध्येयं सिध्यतु सम्पूर्णतयेति समाशास्ते वेदमुखेन विज्ञापयिता भवदीयो भारतीतनयो दैवरातः —

'ॐ भद्रं नो अपि वातय मनः ॥
ॐ शान्तिः शान्तिः शान्तिः ॥'

शके १८८० तमे
विलम्बिसंवत्सरे फा० कृ०
एकादश्यां, शुक्रवासरे
दिनाङ्कः ३-४ १९५९

भारतीय जनता-जगद्-ईशविधेयः
दैवरातः
ऋषिकुलयोगाश्रमः,
पोस्ट– गोकर्ण, जिल्हा– उत्तर कन्नड